**This Question Paper consists 35 questions and 4 printed pages.**
**अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।**

**Roll No.** | | | | | | | | | | | | |
**अनुक्रमाङ्कः**

**Code No. 58/S/A**
**गूढसंख्या**

**Set**
**स्तबकः** **A**

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ______________________

**Signature of two Invigilators** **1.** ______________________
**(निरीक्षकयोः हस्ताक्षरम्)**

**2.** ______________________

---

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।
2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां च संख्या प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।
3 वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।
4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एवं लेख्यानि ।
5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।
6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या ।
7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एवं लेख्यानि ।

# SANSKRIT SAHITYA
# संस्कृतसाहित्यम्
# (248)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10** **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः×प्रश्नाः=पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां प्रश्नानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) वित्तस्य गतयः सन्ति –

(क) तिस्त्रः (ख) चतस्त्रः

(ग) पञ्च (घ) षट्

(2) ''उपायं चिन्तयेत्प्राज्ञस्तथापायं च चिन्तयेत् ।
पश्यतो बकमुखस्य नकुलेन हता बकाः ॥'' – अयं श्लोकः कुत्र प्राप्यते ?

(क) वेतालपञ्चविंशतौ (ख) शुकसप्ततौ

(ग) पञ्चतन्त्रे (घ) हितोपदेशे

(3) काव्ये कति रसाः सन्ति ?

(क) अष्टौ (ख) नव

(ग) दश (घ) एकादश

(4) राजशेखरमते काव्यकवेः कति भेदाः ?

(क) त्रयः (ख) पञ्च

(ग) अष्टौ (घ) दश

(5) कस्मिन् अलङ्कारे सधर्मस्य वस्तुनः प्रतिबिम्बनं भवति ?

(क) समासोक्तिः (ख) दृष्टान्तः

(ग) उपमा (घ) रूपकम्

(6) गङ्गायां घोषः इत्यत्र का लक्षणा ?

(क) रूढिमूला (ख) प्रयोजनमूला

(ग) उपादानमूला (घ) लक्षणलक्षणा

(7) हनुमता किं शास्त्रं बहुधा अधीतम् आसीत् ?

(क) न्यायशास्त्रम् (ख) व्याकरणशास्त्रम्

(ग) ज्योतिषशास्त्रम् (घ) शिक्षाशास्त्रम्

(8) कस्मात्पर्वतात् हनुमान् रामलक्ष्मणयोः समीपमागच्छत् ?

(क) हिमालयात् (ख) विन्ध्यपर्वतात्

(ग) ऋष्यमूकपर्वतात् (घ) अयोध्यापर्वतात्

(9) कस्मिन् देशे कर्णस्य हयाः प्रादुर्भूताः ?

(क) विन्ध्यप्रदेशे (ख) काम्बोजदेशे

(ग) कुरुक्षेत्रप्रदेशे (घ) काश्मीरप्रदेशे

(10) महाभारतस्य कस्मिन् पर्वणि किरातार्जुनयुद्धवृत्तान्तः वर्तते ?

(क) आदिपर्वणि (ख) सभापर्वणि

(ग) शान्तिपर्वणि (घ) वनपर्वणि

**[B]** दशानां यथानिर्देशम् उत्तराणि लिखत । **2×10=20**

(1) "विधिरहो बलवानिति मे मतिः" – कथं विधिः बलवान् इति ज्ञायते ?

(2) प्रजापीडनसन्तापात् किं किं भवति लिखत ।

(3) धर्मबुद्धयः परस्त्रीः परद्रव्याणि सर्वभूतानि च केन केन भावेन पश्यन्ति ?

(4) वेतालप्रश्नस्य उत्तरं जानता अपि विक्रमादित्येन उत्तरं न दीयते चेत् किं भविष्यति ? उत्तरं दीयते चेत् वा किं भविष्यति ? 1+1

(5) काव्यमीमांसादिशा कवेः कति भेदाः ? के च ते ? 1+1

(6) रामलक्ष्मणयोः समीपे हनुमता सुग्रीवस्य कीदृशी वर्णना विहिता ?

(7) कर्णभारः केन रचितः ? तस्य कति नाटकानि प्रसिद्धानि ? 1+1

(8) कर्णः ब्राह्मणाय कीदृशान् गजान् दातुम् ऐच्छत् ?

(9) राजानः कैः किमर्थं न वञ्चनीयाः ? 1+1

(10) दुर्योधनस्य युधिष्ठिराद्भीतिः कथं ज्ञायते ?

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) विद्याया महात्म्यचतुष्टयं सुभाषिताधारेण लिखत ।

(2) अनेकसुशिरं वाद्यं कान्तं च ऋषिसंज्ञितम् ।

चक्रिणा च सदाराध्यं यो जानाति स पण्डितः ॥ इति श्लोकं व्याख्यात ।

(3) ''मृगात् सिंहः पलायते'' इति समस्यां समाधत्त ।

(4) ''विषाङ्गनावृत्तम्'' इति कथाधारेण स्त्रीणां कदा दुःखं भवतीति लिखत ।

(5) रसनिष्पत्तेः कारणानि व्याख्यात ।

(6) लक्ष्मणहनुमतोः वार्तालापं स्वभाषया लिखत ।

(7) हनुमतः व्याकरणज्ञानं कीदृशमासीत् इति रामवचनानुसारं लिखत ।

(8) कर्णः युद्धे अशुभलक्षणं केन प्रकारेण वर्णितवान् ?

(9) दुर्योधनस्य युधिष्ठिराद् भीतिरस्तीति वनेचरवचनानुसारं प्रदर्शयत ।

(10) निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।

तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ इति श्लोकं व्याख्यात ।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) ''मूर्खानां न समादरः'' इति पञ्चतन्त्रकथायाः सारं लिखत ।

(2) व्यञ्जनां परिचाययत ।

(3) रामलक्ष्मणयोः शस्त्राणि हनुमद्वचनानुसारं वर्णयत ।

(4) भासस्य परिचयः दीयताम् ।

(5) राज्यरक्षणाय दुर्योधनेन गृहीतां नीतिम् आलोचयत ।

---